# ॥ वाल्मीकि रामायण॥

## ७ उत्तरकाण्ड

### अध्याय ६४

प्रस्थाप्य तु स शत्रुघ्नं भ्रातृभ्यां सह राघवः ।
प्रमुमोद सुखी राज्यं धर्मेण परिपालयन् ॥ १॥

ततः कतिपयाहःसु वृद्धो जानपदो द्विजः ।
शवं बालमुपादाय राजद्वारमुपागमत् ॥ २॥

रुदन्बहुविधा वाचः स्नेहाक्षरसमन्विताः ।
असकृत्पुत्रपुत्रेति वाक्यमेतदुवाच ह ॥ ३॥

किं नु मे दुष्कृतं कर्म पूर्वं देहान्तरे कृतम् ।
यदहं पुत्रमेकं त्वां पश्यामि निधनं गतम् ॥ ४॥

अप्राप्तयौवनं बालं पञ्चवर्षसमन्वितम् ।
अकाले कालमापन्नं दुःखाय मम पुत्रक ॥ ५॥

अल्पैरहोभिर्निधनं गमिष्यामि न संशयः ।
अहं च जननी चैव तव शोकेन पुत्रक ॥ ६॥

न स्मराम्यनृतं ह्युक्तं न च हिंसां स्मराम्यहम् ।
केन मे दुष्कृतेनाद्य बाल एव ममात्मजः ।
अकृत्वा पितृकार्याणि नीतो वैवस्वतक्षयम् ॥ ७॥

नेदृशं दृष्टपूर्वं मे श्रुतं वा घोरदर्शनम् ।
मृत्युरप्राप्तकालानां रामस्य विषये यथा ॥ ८॥

रामस्य दुष्कृतं किं चिन्महदस्ति न संशयः ।
त्वं राजञ्जीवयस्वैनं बालं मृत्युवशं गतम् ॥ ९॥

भ्रातृभिः सहितो राजन्दीर्घमायुरवाप्नुहि ।
उषिताः स्म सुखं राज्ये तवास्मिन्सुमहाबल ॥ १०॥

सम्प्रत्यनाथो विषय इक्ष्वाकूणां महात्मनाम् ।
रामं नाथमिहासाद्य बालान्तकरणं नृपम् ॥ ११॥

राजदोषैर्विपद्यन्ते प्रजा ह्यविधिपालिताः ।
असद्वृत्ते तु नृपतावकाले म्रियते जनः ॥ १२॥

यदा पुरेष्वयुक्तानि जना जनपदेशु च ।
कुर्वते न च रक्षास्ति तदाकालकृतं भयम् ॥ १३॥

सव्यक्तं राजदोषोऽयं भविष्यति न संशयः ।
पुरे जनपदे वापि तदा बालवधो ह्ययम् ॥ १४॥

एवं बहुविधैर्वाक्यैर्निन्दयानो मुहुर्मुहुः ।
राजानं दुःखसन्तप्तः सुतं तमुपगूहति ॥ १५॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 26, 1998; Send corrections to sanskrit@cheerful.com